# RiddhistavaH

# ઋદ્ધિસ્તવઃ

## Document Information

Text title : shrIRiddhistava

File name : Riddhistava.itx

Category : vishhnu, venkateshwara, stotra, vishnu, stava

Location : doc_vishhnu

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : December 19, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# ઋદ્ધિસ્તવઃ

શ્રીમન્વૃષભશૈલેશ વર્ધતાં વિજયી ભવાન્ ।
દિવ્યં ત્વદીયમૈશ્વર્યં નિર્મર્યાદં વિજૃમ્ભતામ્ ॥ ૧॥

દેવીભૂષાયુધૈર્નિત્યૈર્મુક્તૈર્મોક્ષૈકલક્ષણૈઃ ।
સત્ત્વોત્તરૈસ્ત્વદીયૈશ્ચ સઙ્ગઃ સ્તાત્સરસસ્તવ ॥ ૨॥

પ્રાકારગોપુરવરપ્રાસાદમણિમણ્ટપાઃ ।
શાલિમુદ્ગતિલાદીનાં શાલાશ્શૈલકુલોજ્જ્વલાઃ ॥ ૩॥

રત્નકાઞ્ચનકૌશેયક્ષૌમક્રમુકશાલિકાઃ ।
શય્યાગૃહાણિ પર્યઙ્કવર્યાઃ સ્થૂલાસનાનિ ચ ॥ ૪॥

કનત્કનકભૃઙ્ગારપતદ્ગ્રહકલાચિકાઃ ।
છત્રચામરમુખ્યાશ્ચ સન્તુ નિત્યાઃ પરિચ્છદાઃ ॥ ૫॥

અસ્તુ નિસ્તુલમવ્યગ્રં નિત્યમભ્યર્ચનં તવ ।
પક્ષેપક્ષે વિવર્ધન્તાં માસિમાસિ મહોત્સવાઃ ॥ ૬॥

મણિકાઞ્ચનચિત્રાણિ ભૂષણાન્યમ્બરાણિ ચ ।
કાશ્મીરસારકસ્તૂરીકર્પૂરાદ્યનુલેપનમ્ ॥ ૭॥

કોમલાનિ ચ દામાનિ કુસુમૈસ્સૌરભોત્કરૈઃ ।
ધૂપાઃ કર્પૂરદીપાશ્ચ સન્તુ સન્તતમેવ તે ॥ ૮॥

નૃત્તગીતયુતં વાદ્યં નિત્યમત્ર વિવર્ધતામ્ ।
શ્રોત્રેષુ[ચ] સુધાધારાઃ કલ્પન્તાં કાહલીસ્વનાઃ ॥ ૯॥

કન્દમૂલફલોદગ્રં કાલેકાલે ચતુર્વિધમ્ ।
સૂપાપૂપઘૃતક્ષીરશર્કરાસહિતં હવિઃ ॥ ૧૦॥

ઘનસારશિલોદગ્રૈઃ ક્રમુકાષ્ટદલૈસ્સહ ।
વિમલાનિ ચ તામ્બૂલીદલાનિ સ્વીકુરુ પ્રભો ॥ ૧૧॥

પ્રીતિભીતિયુતો ભૂયાદ્ભૂયાન્ પરિજનસ્તવ ।
ભક્તિમન્તો ભજન્તુ ત્વાં પૌરા જાનપદાસ્તથા ॥ ૧૨॥

વરણીધનરત્નાનિ વિતરન્તુ ચિરં તવ ।
કૈઙ્કર્યમખિલં સર્વે કુર્વન્તુ ક્ષોણિપાલકાઃ ॥ ૧૩॥

પ્રેમદિગ્ધદૃશઃ સ્વૈરં પ્રેક્ષમાણાસ્ત્વદાનનમ્ ।
મહાન્તસ્સન્તતં સન્તો મઙ્ગલાનિ પ્રયુઞ્જતામ્ ॥ ૧૪॥

એવમેવ ભવેન્નિત્યં પાલયન્ કુશલી ભવાન્ ।
મામહીરમણ શ્રીમાન્ વર્ધતામભિવર્ધતામ્ ॥ ૧૫॥

પત્યુઃ પ્રત્યહમિત્થં યઃ પ્રાર્થયેત સમુચ્છ્રયમ્ ।
પ્રસાદસુમુખઃ શ્રીમાન્ પશ્યત્યેનં પરઃ પુમાન્ ॥ ૧૬॥

॥ ઇતિ ઋદ્ધિસ્તવઃ સમ્પૂર્ણઃ ॥

From a telugu book veNkaTeshakAvyakalApa
Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

*RiddhistavaH*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*